**जलाष** न० जायते जल–ड जः लाषोऽभिलाषो यत्र । १सुखे निघ० अन्येच्छानधीनेच्छाविषयत्वात् तस्य तथात्वम् । अ-स्त्यर्थे अर्श०अच् ।२तद्वति त्रि०। "यो अस्ति भेषजो जलाषः" ऋ०२।३३।७ "जलाषः सर्वेषां सुखकरः" भा० "गतिमेध-पतिं रुद्रं जलाषभेषजम्" ऋ० ४६।४ । ३जले निघ० ।

**जलाषाह्** त्रि०जलं सहते सह–खि–पूर्वपददीर्घः सुषामादि० षत्वम् । जलसोढ़रि । सुषामादिगणे अमन्ततयैव पाठा-दन्यत्र न षत्वम् । जलाषाहौ । स्वादौ झलि तु"षाड्ः षः"षाड्रूपत्वे षत्वम् जलाषाट् जलाषाड्स्यामित्यादि ।

**जलाष्टीला** स्त्री जलेनाष्टीला । पुष्करिण्याम् हारा०।

**जलासुका** स्त्री जलमेवासवोऽस्याः कप् ।१जलौकायाम् अमरः

**जलाह्वय** पु० जले आह्वयः शोभमानतया कीर्त्तनमस्य । उत्पले राजनि० । [ भरतः ।

**जलिका** स्त्री जलसद्भवस्थानत्वेनास्त्यस्याः ठन् । जलौकायां

**जलुका** स्त्री जल–उक । जलौकायां शब्दर०।

**जलूका** स्त्री जलमोको यस्याः पृषो०।१जलौकायाम् हेमच० "न जलूकादिवत् संक्रमणमिहोपदिश्यते" तैत्ति० भा० ।

**जलेचर** पुंस्त्री जले चरति चर–ट वा अलुक् स०। हंसादौ स्त्रियां टित्त्वात् ङीप् । "यक्षोऽहमस्मि भद्रं ते नास्मि पक्षी जलेचरः" भा० व० ३१३अ० । स तमा-दाय कौन्तेयो विस्फुरन्तं जलेचरम्" भा० आ० २१अ०

**जलेच्छया** स्त्री जलमेति इ–क्विप् जलेति शेते शी–अच् । जलोपेतस्थानरोहिणि हस्तिशुण्डावृक्षे शब्दर० ।

**जलेज** न० जले जायते जन–ड वा अलुक् समा० । वारिजे १पद्मे । "उद्भासीनि जलेजानि दुन्वन्त्यदयितं जनम्" भट्टिः । २जले जातमात्रे त्रि० ।

**जलेजात** न० ७त०। १पद्मे शब्दरत्ना०। २वारिजातमात्रे त्रि०।

**जलेन्द्र** पु० ६त०। १वरुणे २महादेवे जम्भलाख्ये ३पूर्व्वयक्षे मेदि० ।

**जलेन्धन** पु०जलान्येवेन्धनानि यस्य । १वाड़वानले बाड़वा-नलशब्दे दृश्यम् । २सौरविद्युदादितेजसि शब्दार्थचि० ।

**जलेभ** पुंस्त्री जलजात इभः । जलहस्तिनि स्त्रियां जाति-त्वात् ङीष् । "मस्फुरत्तिमिजलेभजिह्मगः" छ०१३स०

**जलेयु** पु० पूरुवंश्ये रौद्राश्वन्दपत्नाप्सरोजाते पुत्रभेदे "रौद्रा श्वस्य महेष्वासा दशाप्सरसि सूनवः" इत्युपक्रमे "स्थण्डि-लेयुर्वनेयुश्च जलेयुश्च महायशाः" भा० आ० ६४ अ० ।

**जलेरुहा** स्त्री जले रोहति–रुह–क–अलुक् स० । १कुटु-म्बिनीवृक्षे राजनि०। २जलरोहिणि पद्मादौ त्रि० ।

**जलेला** स्त्री कुमारानुचरमातृभेदे "उत्क्राथिनी जलेला च महावेगाथ कङ्कणा" भा० श० ४७ अ० ।

**जलेवाह** पु० जले तोयाभ्यन्तरे वाहो गतिरस्य । (डुबारि) ख्याते जलमज्जनेन तत्स्थपदार्थोत्तोलके पुरुषभेदे । "जलेवाहानथाहूय बहूंस्तत्र न्ययोजयत् । ते कृत्वा परमं यत्नमापुराभरणं न तत्" पाद्मे पा० ख० ।

**जलेश** पु० ६त० ।१वरुणे २समुद्रे च "कालं गतिं तेऽखिल-देवतात्मनो दिशश्च कर्णौ रसनं जलेशम्" भाग० ८।७।२० विराड्रूपोक्तौ "पातयामास सेनायां जलेशस्य स दानवः" हरिवं-२५२अ०। जलेश्वरादयोऽप्यत्र । "भीमो-द्भवां प्रति नले च जलेश्वरे च" नैष० । "यमकुबेरजले० श्वरवज्रिणाम्" रघुः । २वर्षभेदे जलाधिपे रव्यादौ च ।

**जलेशय** पु० जले शेते शी–अच् अलुक् समा० । १विष्णौ "सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्" रघुः । तस्य तथात्वं जलशायिशब्दे दृश्यम् । २जलस्थायिमात्रे त्रि० "यस्य दृंहितशब्देन कूर्मोऽप्यन्तर्जलेशयः" भा० आ० २६ अ० । ३मत्स्ये पुंस्त्री त्रिका० । योपधत्वात् स्त्रियां टाप् ।

**जलो(लौ)का** स्त्री जलमोकोऽस्य पृषो०। (जोंक) १जलस्थे सरीसृपभेदे भरतोऽस्य द्विधा पपाठ ।

**जलोच्छ्वास** पु०जलान्युच्छ्वसन्त्येभिः उद्+श्वस–घञ् ।१प्रवृद्ध-जलस्य निर्गमनमार्गे २परीवाहे अमरः। भावे घञ् ६त०। ३अधिकजलस्य सर्वतोवहने च । (छयलापि) ।

**जलोदर** न०जलप्रधानमुदरं यस्मात् ५ब०। उदरामयरोगभेदे। "यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विविक्तोऽप्यथ वा निरूढः। पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि । स्नेहोपलिप्तेष्वथ वापि तेषु दकोदरम् पूर्ववदभ्युपैति। स्निग्धं महत्तत् परिवृत्तना-भिसमाततं पूर्णमिवाम्बुना च । यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरन्तत् । जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतम् । बलिनस्तदजाताम्बु यत्न-साध्यं नवोत्थितम्" माधवकरस्तन्निदानाद्ध्यारभ्य ।

**जलोद्धतगति** स्त्री "रसैर्जसजसा जलोद्धतगतिः" छ०र०उक्ते द्वादशाक्षरपादके १छन्दोभेदे । जलेन उद्धता गतिरस्य । २जलेनोद्धतगतिके त्रि० "यदीयहलतो विलोक्य विपदं कलिन्दतनया जलोद्धतगतिः" छन्दोम० ।

**जलोद्भव** त्रि० जले उद्भवोऽस्य । १जलजाते २गुडूत्वाचुपे ३लघुब्राह्मीभेदे स्त्री राजनि०जलसमुद्भवत्वात् भू अपादाने